दिनाङ्क :- 04.10.2024

सायम् - 06:20

आदौ-मुख्यवार्ता:

· राष्ट्रपति: द्रौपदीमुर्मु: प्रोक्तवती यत् विश्वस्य अनेकेषु भागेषु अशान्ति: व्यावृत्तास्ति। यदा मानवीय-मूल्यानि अपि अपचितानि भवन्ति तदा शान्ति-एकतयो: महत्त्वम् इतोऽपि संवर्धितमस्ति।

· प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां कौटिल्य-आर्थिक-सम्मेलनम् सम्बोधयिष्यति।

· श्वो भविष्यमाणाय हरियाणा-विधानसभा-निर्वाचनाय सर्वा: व्यवस्था: सम्पादिता:।

· सर्वोच्च-न्यायालयेन तिरुमाला-तिरुपतिमन्दिपरिसरे प्रसादमोदकानां विनिर्माणे मिश्रितघृतस्य उपयोग-विषयिक-पर्यवेक्षणाय स्वतन्त्रस्य विशिष्टान्वेषणदलस्य संघटनाय आदेशो दत्त:।

· महिलानां विंशतिं प्रति विंशति: क्रिकेट-विश्वचषकप्रतिस्पर्धायाम् अद्य दुबय्यां भारतस्य प्रथमं द्वन्द्वं न्यूजीलैण्ड-दलेन साकं भारतीयसमयानुसारि सायं सार्धसप्तवादनात् भविष्यति।

राष्ट्रपति:-राजस्थानमिति

राष्ट्रपति: द्रौपदीमुर्मु: प्रोक्तवती यत् आध्यात्मिक-प्रवृत्त्या न केवलं व्यक्तिगतजीवनस्य अपितु समाज-भूमि-सम्बद्धानाम् अनेकासां समस्यानां समाधानम् अन्वेष्टुं शक्यते। राष्ट्रपति: अद्य राजस्थानस्य आबूरोड-स्थिते ब्रह्मकुमारीज-संस्थाने स्वच्छ-स्वस्थ-समाजाय आध्यात्मिकतायाम् आधारितस्य समायोजितस्य च वैश्विक-शिखर-सम्मेलनस्य औद्घाटनिकं सत्रं सम्बोधयन्ती आसीत्। अनया अत्रावसरे प्रोदीरितं यत् विश्वस्य अनेकेषु भागेषु अशान्ति: व्यावृत्तास्ति। मानवीय-मूल्यानि अपि अपचितानि भवन्त्येव। तावत् एतादृशीषु परिस्थितिषु शान्ति-एकतयो: महत्त्वम् इतोऽपि संवर्धितमस्ति। राष्ट्रपतिना अग्रे कथितं यत् समग्रविश्वम् अद्यत्वे समये ग्लोबलवॉर्मिंग इति भूमण्डलीय-ऊष्णतां पर्यावरण-प्रदूषणस्य दुष्प्रभावान् च अभिमुखी-करोति इति, तत: एतस्मिन् समये अस्माकं कर्तव्यमिदं भवेत् यत् अस्माभि: ईदृश: सङ्कटान् अपाकर्तुं सर्वविधप्रयासा: करणीया:। मनुष्याणां पुण्यकर्माणि एव फलोत्पादकानि भवन्त्येव।

कौटिल्य- आर्थिक सम्मेलनम्

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्यां कौटिल्य - आर्थिक - सम्मेलनम् सम्बोधयिष्यति । सम्मेलनमिदं अक्टूबरमासस्य षड्दिनाङ्कं यावत् प्रचलिष्यति । वित्तमन्त्रिणा निर्मलासीतारामन इत्यनया सम्मेलनमिदम् उद्घाटितम् अस्य वर्षस्य सम्मेलनमिदं हरित-परिवर्तनस्य वित्तपोषण-भू-आर्थिक- विखण्डन- विकासादृशेषु

विषयेषु केन्द्रितमस्ति । अन्ताराष्ट्रिय-विद्वद्भिः समं भारतीयविद्वांस: नीति निर्मातारश्च भारतीय-अर्थव्यवस्थया सह दक्षिणभुवः अर्थव्यव्यस्थायाः महत्वपूर्ण - समाह्वानेषु विचारविनिमयं करिष्यन्ति।

सर्वोच्च न्यायालय-तिरुपति/वादश्रवणं सम्पन्नम्

सर्वोच्च-न्यायालयेन तिरुमाला-तिरुपति-देवस्थानम् इत्यस्मिन् मन्दिपरिसरे प्रसादमोदकानां विनिर्माणे मिश्रितघृतस्य उपयोग-विषयिक-पर्यवेक्षणाय एस आई टी इति विशेषान्वीक्षणदलस्य घटनाय आदेशो दत्त:। दलेऽस्मिन् केन्द्रीयान्वेषणविभागस्य द्वौ अधिकारिणौ, द्वौ आन्ध्रप्रदेश-आरक्षिबलस्य अधिकारिणौ, एकश्च भारतीय-खाद्य-संरक्षा अथ मानक-प्राधिकरणस्य अधिकारी भविष्यति। केन्द्रीयान्वेषणाभिकरणस्य निदेशक: पर्यवेक्षणस्य निरीक्षणं विधास्यति। सर्वोच्च-न्यायालयेन अद्य प्रकरणस्यास्य सर्वविधश्रवणानन्तरम् उक्तं यत् एतेषु आरोपेषु प्रत्यारोपेषु च न किमपि लब्धम्। तेनोक्तं यत् न्यायालयस्य निर्णयानां राजनीतिकक्षेत्रेषु प्रयोग: न भवेदिति। न्यायालयेन एतदपि स्पष्टीकृतं यत् कोटिश: श्रद्धालूनां भावनाया: शमनाय आदेशोऽयं प्रदत्त: इति।

हरियाण-विधानसभा

श्वो भविष्यमाणाय हरियाणा-विधानसभा-निर्वाचनाय सर्वा: व्यवस्था: सम्पादिता:। नवति: विधानसभाक्षेत्रेभ्य: मतदानं सुनिश्चितमस्ति। मतदानप्रक्रिया प्रात: सप्तवादनत: सायं षड्वादनपर्यन्तं समनुष्ठास्यते। अस्मिन् नैर्वाचनिक-रणे एकत्रिंशदधिकैकसहस्रं प्रत्याशिनां नियतिनिर्णयं भविष्यति। सुचारुरीत्या मतदानप्रक्रियां विधातुं द्वात्रिंशदधिक-षड्शतोत्तर-विंशतिसहस्रं मतदान-केन्द्राणि स्थापितानि सन्ति। जम्मूकश्मीररस्य त्रिचरणात्मकी हरियाणायाश्च एकचरणात्मिकी मतगणना मासस्यास्य अष्टमे दिनांके निर्धारितास्ति।

विराम:

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

राजनाथसिंह:-एसआईडीएम

रक्षामन्त्री राजनाथसिंह: अद्य उक्तवान् यत् निवर्तमान सत्रेऽस्मिन् गृहगत-रक्षोत्पादनम् सप्तविंशतिसहस्राधिक-एकलक्षकोटिरुप्यकाणां कीर्तिमदपि उल्लङ्घितवत्। रक्षामन्त्री नवदिल्ल्यां एस आई डी एम इत्युक्ते भारतीय-रक्षोत्पादनसंघस्य सप्तमं वार्षिकोपवेशनम् सम्बोधयन् अग्रे उक्तवान् यत् प्रशासनेन

रक्षाक्षेत्रे अत्याधुनिक-प्रौद्योगिक्या: विकासाय नैका: योजना: सन्ति समारब्धा:। श्रीसिंहेन आईडेक्स इत्यनेन सह प्रौद्योगिकी-विकासकोष: अदिति योजना इत्यादीनां विषयेऽपि निगदितम् ।

## ऋतुविज्ञानविभाग:

भारतर्तु-विज्ञानविभागेन भविष्यवाणी कृतास्ति यत् अद्य मेघालय-उपहिमालयक्षेत्र-पश्चिमबंगाल-सिक्किम-असम-अरुणाचलप्रदेशेषु च अत्यधिकवृष्टि: भवितुमर्हतीति। विभागेन एतदपि योजितं यत् पश्चिमबंगाल-बिहारप्रदेशयो: गङ्गोत्तरवर्तिषु क्षेत्रेषु अद्य, नागालैण्ड-मणिपुर- मिजोरम- त्रिपुरासु च आगामिदिनद्वयं यावत् धारासारवर्षाया: सम्भावना अस्तीति।

## उत्तरप्रदेश-मिर्जापुर घटना

उत्तरप्रदेशस्य मिर्जापुरजनपदे अद्य प्रात:काले एकस्यां दुरापादितायां मार्ग-दुर्घटनायां दशजना: दिवङ्गता:। त्रय: च व्रणिता: अभवन्। इयं दुर्घटना मिर्जापुर-वाराणसी-सीम्नि मिर्जामुरादं निकषा जाता। मिर्जापुरस्य आरक्षि-अधीक्षक: अभिनन्दन: ख्यापितवान् यत् सङ्घर्षे क्षतिग्रस्ते कृषिवाहने त्रयोदश श्रमिका: आरूढा: आसन्। व्रणित-जनानाम् उपचार: चिकित्सालये प्रचलति। राष्ट्रपति: द्रौपदीमुर्मु: मृतान् प्रति शोकसंवेदनां प्रकटितवती। प्रधानमन्त्री नरेन्द्रमोदी मृतकानां परिजनेभ्य: द्विलक्षरूप्यकाणाम् अनुग्रह-राशिम् उद्घोषितवान्। व्रणितेभ्यश्च प्रधानमन्त्रि-राष्ट्रियापात्कोषात् पञ्चाशत्सहस्र- रूप्यकाणि प्रदास्यते। मुख्यमंत्री योगी आदित्यनाथ: मिर्जापुरसांसद: अनुप्रियापटेलश्च दुर्घटनाम् अभिलक्ष्य गभीरं शोकं प्रकटितवन्तौ। राज्यप्रशासनेनापि मृतकानां परिजनेभ्य: द्विलक्षरुप्यकाणाम् अनुग्रहराशि: उद्घोषित:।

## बिहार-जलाप्लाव:

बिहारप्रदेशे जलाप्लावस्य स्थिति: गभीरा एवास्ति, यतो हि दरभङ्गा-पूर्वीय चम्पारण-खगडिया-मुजफ्फरपुर-जनपदेषु जलाप्लावनत्वात् नैकानि नूतनक्षेत्राणि सन्ति प्रभावितानि। अधवारा-समूहस्य बागमती-कमला-बलानदृशा: नद्य: औघ्यां सन्ति, येन नैके ग्रामा: जलमग्ना: जाता:। अष्टादश-जनपदेषु षोडशलक्षाधिकजना: प्रभाविता: सन्ति। मुख्यमन्त्रिणा नीतीशकुमारेण अद्य प्रभावित-क्षेत्राणां स्थिते: निरीक्षणं कृतम्। इत: पूर्वं स: प्रभावितक्षेत्रेभ्य: दीयमानानां खाद्यादिसामग्रीणां व्यवस्थां निरीक्षितुं दरभंगाक्षेत्रं सम्प्राप्तवान्। तेन दरभङ्गाया: लहेरिया-सराय इत्यत्र आवृत्तक्रीडाङ्गणे खाद्यवस्तूनां पुटकादिनिर्माणकार्यस्य निरीक्षणम् विहितम्। श्रीकुमारेण बिरौल इत्यत्र सामुदायिक-पाकशालाया: अपि निरीक्षणं कृतम्। मुख्यमन्त्रिणा दूरस्थेषु क्षेत्रेषु खाद्यसामग्र्यादीनां समुचित-वितरणाय अपि अधिकारिण: निर्दिष्टा:।

## भारतीयवायुसेना

भारतीय-वायुसेना स्वकीयस्य द्विनवतितमस्य स्थापनादिवसस्य समुपलक्ष्ये सोमवासरात् आरभ्य बुधवासरं यावत् चेन्नैनगरे उड्डयनप्रदर्शनं समायोजयिष्यति। अद्य नवदिल्ल्यां वार्ताहरैः सह भाषमाणः वायुसेनाप्रमुखः एयरमार्शल-अमरप्रीतसिंहः सूचितवान् यत् वायु-सैन्यबलं स्वीयानि उपकरणानि आपूर्ति-शृङ्खलाः च समुचितविधिना स्थापयितुं भविष्यकालिक-सुरक्षा-समाह्वनानि अपाकर्तुं च स्वदैशिक उत्पादेषु केन्द्रितं वर्तते। तेन अग्रे योजितं यत् वायुसेनायाः लक्ष्यमस्ति यत् सप्तचत्वारिंशदधिकद्विसहस्रतम-वर्षं यावत् भारते एव सर्वविध-रक्षोत्पादन-करणमिति। वायुसेना-प्रमुखेण एतदपि सबलं प्रतिपादितम् यत् गतेषु कतिपयवर्षेषु प्रशिक्षणकार्याणि-समेधितानि। तेनोक्तं यत् वर्षेऽस्मिन् वायुशक्तिः गगनशक्तिः तरङ्गशक्तिश्च अभ्यासत्रयमपि विहितमस्तीति।

## प्रधानमन्त्री-महाराष्ट्रम्

प्रधानमन्त्री नरेन्द्रमोदी श्वः महाराष्ट्रं प्रति यास्यति। भ्रमणावधौ असौ महाराष्ट्रस्य वाश्मिजनपदे प्रधानमन्त्रि-किसान-सम्मान-निधि-योजनायाः अष्टदशतमं पुटकम् उद्घाटयिष्यति। कार्यक्रमावधौ राष्ट्रस्य प्रायशः सार्धनवकोटिः प्रत्यक्षलाभ-हस्तान्तरण माध्यमेन विंशतिसहस्रकोटिरूप्यकाणां राशेः वित्तीयलाभं भविष्यति।

## महिला-क्रेट्रिति

महिलानां विंशतिं प्रति विंशतिः क्रिकेट-विश्वचषकप्रतिस्पर्धायाम् अद्य दुबय्यां भारतस्य प्रथमं द्वन्द्वं न्यूजीलैण्ड-दलेन साकं भारतीयसमयानुसारि सायं सार्धसप्तवादनात् भविष्यति।

।। इति वार्ताः।।